# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - मार्च/एप्रिल - २०२०

| | | |
|---|---|---|
| कक्षा-आचार्य-२ | प्रश्नपत्रम् – ४ | गुणाः – ७० |
| विषयः – पुराणेतिहासः | सत्रम्- ४ चतुर्थम् | समयः- ११:३० तः ०२:३० |
| दिनाङ्कः – ३०/०३/२०२० | सन्दर्भग्रन्थः – अग्निपुराणम्- १६८-२००, गरुडपुराणम् – प्रेतकल्पः | |

---

### प्रथमान्वितिः (Unit 1)

गुणाः

**प्रश्नः १ अधोलिखितपद्याभ्यामेकस्य सन्दर्भप्रसङ्गान्वयपूर्वकं व्याख्यानं कुर्वन्तु।** ०५

१ वक्ष्ये प्रतिपदादीनि व्रतान्यखिलदानि ते ।
कार्तिकाश्वयुजे चैत्रे प्रतिपद् ब्रह्मणस्थितिः।।

२ चतुर्थी व्रतान्याख्यास्ये भुक्तिमुक्तिप्रदानिते ।
माघे शुक्लचतुर्थ्यां तु ह्युपवासी यजेत् गणम् ।।

**प्रश्नः २ कस्याप्येकस्योत्तरं सविस्तरं यथाग्रन्थं लिखन्तु।** १०

१ परान्नभक्षणे प्रायश्चित्तविधानं वर्णयत।

२ व्रते भक्ष्याभक्ष्यविचारः सम्यक् लिख्यताम्।

### द्वितीयान्वितिः (Unit 2)

**प्रश्नः ३ अधोलिखितपद्याभ्यामेकस्य सन्दर्भप्रसङ्गान्वयपूर्वकं व्याख्यानं कुर्वन्तु ।** ०५

१ एकादश्यां विष्णुपूजा कार्या सर्वोपकारिणी।
धनवान् पुत्रवान् लोके विष्णुलोके महीयते ।।

२ द्रव्यस्थो वामनो नित्यं वामनाय नमो नमः।
प्रदत्तदक्षिणो विप्रान् संभोज्यान्नं स्वयं चरेत् ।।

**प्रश्नः ४ कस्याप्येकस्योत्तरं सविस्तरं यथाग्रन्थं लिखन्तु।** १०

१ दीपदानव्रतमहत्वं प्रतिपादयत।

२ तृतीयाव्रतमहत्वं सम्यक् वर्णयन्तु।

### तृतीयान्वितिः (Unit 3)

**प्रश्नः ५ अधोलिखितपद्याभ्यामेकस्य सन्दर्भप्रसङ्गान्वयपूर्वकं व्याख्यानं कुर्वन्तु।** ०५

१ न ज्ञानमार्गो न च योग मार्गो न कर्ममार्गो न च भक्तिमार्गः।
न साधुसङ्गात् किमपि श्रुतं मया शरीर हे निस्तर यत्वया कृतम्।।

२ न दत्तं न हुतं तप्तं न स्नानं न कृतं हितम्।
यादृशं चरितं कर्म मूढात्मन् भुङ्क्ष्व तादृशम् ।।

**प्रश्नः ६ कस्याप्येकस्योत्तरं सविस्तरं लिख्यताम्।** १०

१ दानतीर्थस्नानमहत्वं यथाग्रन्थं वर्णयत।

२ पञ्चकमरणे पुत्तलदाहविधिः सम्यक् लिख्यताम्।

## चतुर्थान्वितिः (Unit 4)

**प्रश्नः ७ अधोलिखितपद्याभ्यामेकस्य सन्दर्भप्रसङ्गान्वयपूर्वकं व्याख्यानं कुर्वन्तु।** ०५

१ धर्मस्त्वं वृषरूपेण जगदानन्ददायकः।
अष्टमूर्तेरधिष्ठानमग्रतः यच्छ शान्तिं मे।।

२ त्वं भूतकृज्जगद्योनिस्त्वं लोकपरिपालकः।
उपसंहर तस्मात्वमेनं स्वर्गे नयामृतम् ।।

**प्रश्नः ८ कस्याप्येकस्योत्तरं सविस्तरं लिख्यताम्।** १०

१ आशौचविधानं यथाग्रन्थं विवेचयत।

२ वृषोत्सर्गविधानं यथाग्रन्थं निरूपयत।

## संयुक्तान्वितिः (Unit 5)

**प्रश्नः ९ एकद्विवाक्येनोत्तराणि केवलं दशप्रश्नानां लिखन्तु।** १०

१ कीदृशः कल्पवृक्षः जयतु?

२ के निर्माल्यतां न यान्ति?

३ संसारे का मुक्ति दायिनी?

४ पदं कतिविधं किञ्च तत्?

५ दानं कतिविधं किञ्च तत्?

६ पितृमोक्षप्रदः कः अस्ति?

७ गरुडपुराणे कयोः मुख्यसंवादः अस्ति?

८ तार्क्ष्य इति शब्दस्य कोऽर्थः?

९ व्रतभङ्गः कदा भवति?

१० विवाहे को मासः ग्राह्यः?

११ कः स्वर्गं गच्छति?

१२ चान्द्रमासः कया रीत्या भवति?

१३ व्रतस्य परिभाषा का?

१४ पञ्चमीव्रतं किं किं ददाति?

१५ रविवारे श्राद्धकर्ता किं किं लभते?

*************************